श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि कृतिषु

# ॥ श्रीस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीस्तोत्रम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

मातः! कोमलवल्लि! मन्मन इदं युष्मत्कटाक्षाभिधं
भृङ्गं वाञ्छति झङ्कृतिः परतरा यस्येदृशी राजते।
अन्योन्यं धनहेमसङ्गतिवशादस्मन्मनःकर्णयो-
रानन्दं ददती झणज्झणदिति प्रक्रान्तलीलारसा॥ १ ॥

जननि! कोमलवल्लि! कृपानिधे!
जनमिमं कृपणं शरणागतम्।
सकलतापनिवारणलम्पटै-
स्सकृदिव स्नपयस्व विलोकनैः॥ २ ॥

क्षीराम्भोधौ जनकसदने भासि कान्तेन मातः!
कामं चास्मिन् कनकतटिनीसैकते मातृगेहे।
दृश्यस्सोऽयं न खलु विबुधैरप्यहो तत्र नाथः
मन्दानां नः पथि नयनयोरत्र क्लृप्तो भवत्या॥ ३ ॥

शैले काननदुर्गमे कथममी गन्तुं क्षमा बालकाः
इत्येवं करुणारसार्द्रहृदया कान्तस्य कान्तं परम्।
वक्षस्तच्च विहाय पद्मसदने! जाये! वृषाद्रीशितुः
तस्याद्रेः किमुपत्यकापरिसरे वासं व्यधा नः कृते॥ ४ ॥

पराङ्मुखं नाम विधेर्विलासा-
न्नतेष्वमुं सम्मुखमादधाना।
नाथं रमे! तत्पुरतो निविष्टा
तमीक्षसे किं करिशैलमूर्ध्नि॥ ५ ॥

www.prapatti.com

सुन्दरवल्लि ! त्वामालिङ्गन्
सुन्दरबाहुर्वनशैलेन्द्रः ।
सुन्दरवदनस्सुन्दरवर्ष्मा
सुन्दरनामा जयति पतिस्ते॥ ६ ॥

सीते ! मातर्वङ्गुवूर्निलये !
त्वत्तो नान्या मम गतिरस्ति।
त्वयि कृतमागश्शतमपि विदतः
त्वत्कृतराक्षसवनितारक्षाम्॥ ७ ॥

यदुकुलपालकगोकुलबालक-
कौतुकदायिनि ! रुक्मिणि ! माम्।
बालकपालककौतुकदारिणि !
पालय पालय रुक्मिणि ! माम्॥ ८ ॥

हैयङ्गवीननटवक्षसि भासमाने !
सौहित्यदूरललितामृतपार्श्वजाते !।
मातस्सुवर्णमयि ! मां मधुरैः कटाक्षैः
हे लक्ष्मि ! शीतलतमैश्शिशिरीकुरुष्व॥ ९ ॥

श्रियस्स्तोत्रमिदं भव्यं श्रीमच्छ्रीनिधिना कृतम्।
श्रद्धया पठतां नित्यं श्रीरागच्छति मन्दिरम्॥ १० ॥

॥ इति श्रीस्तोत्रं समाप्तम् ॥

www.prapatti.com